श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ द्वितीयः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ द्वितीयः सर्गः ॥

## लङ्कापुर्या वर्णनं तत्र प्रवेशविषये हनुमतो विचारो लघुरूपधरस्य तस्य पुर्यां प्रवेशस्तदानीं चन्द्रोदयशोभाया वर्णनम्

स सागरमनाधृष्यमतिक्रम्य महाबलः।
त्रिकूटस्य तटे लङ्कां स्थितः स्वस्थो ददर्श ह ॥ **5.2.1** ॥

ततः पादपमुक्तेन पुष्पवर्षेण वीर्यवान्।
अभिवृष्टस्ततस्तत्र बभौ पुष्पमयो हरिः ॥ **5.2.2** ॥

योजनानां शतं श्रीमांस्तीर्त्वाप्युत्तमविक्रमः।
अनिःश्वसन् कपिस्तत्र न ग्लानिमधिगच्छति ॥ **5.2.3** ॥

शतान्यहं योजनानां क्रमेयं सुबहून्यपि।
किं पुनः सागरस्यान्तं सङ्ख्यातं शतयोजनम् ॥ **5.2.4** ॥

स तु वीर्यवतां श्रेष्ठः प्लवतामपि चोत्तमः।
जगाम वेगवान् लङ्कां लङ्घयित्वा महोदधिम् ॥ **5.2.5** ॥

शाद्वलानि च नीलानि गन्धवन्ति वनानि च।
मधुमन्ति च मध्येन जगाम नगवन्ति च ॥ **5.2.6** ॥

शैलांश्च तरुसञ्छन्नान् वनराजीश्च पुष्पिताः।
अभिचक्राम तेजस्वी हनूमान् प्लवगर्षभः ॥ **5.2.7** ॥

स तस्मिन्नचले तिष्ठन् वनान्युपवनानि च।
स नगाग्रे स्थितां लङ्कां ददर्श पवनात्मजः ॥ **5.2.8** ॥

सरलान् कर्णिकारांश्च खर्जूरांश्च सुपुष्पितान्।
प्रियालान् मुचुलिन्दांश्च कुटजान् केतकानपि ॥ **5.2.9** ॥

प्रियङ्गून् गन्धपूर्णांश्च नीपान् सप्तच्छदांस्तथा।
असनान् कोविदारांश्च करवीरांश्च पुष्पितान् ॥ **5.2.10** ॥

पुष्पभारनिबद्धांश्च तथा मुकुलितानपि।
पादपान् विहगाकीर्णान् पवनाधूतमस्तकान् ॥ **5.2.11** ॥

हंसकारण्डवाकीर्णा वापीः पद्मोत्पलावृताः।
आक्रीडान् विविधान् रम्यान् विविधांश्च जलाशयान् ॥ **5.2.12** ॥

सन्ततान् विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः।
उद्यानानि च रम्याणि ददर्श कपिकुञ्जरः ॥ **5.2.13** ॥

समासाद्य च लक्ष्मीवान् लङ्कां रावणपालिताम्।
परिखाभिः सपद्माभिः सोत्पलाभिरलङ्कृताम् ॥ **5.2.14** ॥

सीतापहरणात् तेन रावणेन सुरक्षिताम्।
समन्ताद् विचरद्भिश्च राक्षसैरुग्रधन्विभिः ॥ **5.2.15** ॥

काञ्चनेनावृतां रम्यां प्राकारेण महापुरीम्।
गृहैश्च गिरिसङ्काशैः शारदाम्बुदसन्निभैः ॥ **5.2.16** ॥

पाण्डराभिः प्रतोलीभिरुच्चाभिरभिसंवृताम्।
अट्टालकशताकीर्णां पताकाध्वजशोभिताम् ॥ **5.2.17** ॥

तोरणैः काञ्चनैर्दिव्यैर्लतापङ्क्तिविराजितैः।
ददर्श हनुमान् लङ्कां देवो देवपुरीमिव ॥ **5.2.18** ॥

गिरिमूर्ध्नि स्थितां लङ्कां पाण्डुरैर्भवनैः शुभैः।

ददर्श स कपिः श्रीमान् पुरीमाकाशगामिव ॥ **5.2.19** ॥

पालितां राक्षसेन्द्रेण निर्मितां विश्वकर्मणा।
प्लवमानामिवाकाशे ददर्श हनुमान् कपिः ॥ **5.2.20** ॥

वप्रप्राकारजघनां विपुलाम्बुवनाम्बराम्।
शतघ्नीशूलकेशान्तामट्टालकावतंसकाम् ॥ **5.2.21** ॥

मनसेव कृतां लङ्कां निर्मितां विश्वकर्मणा।
द्वारमुत्तरमासाद्य चिन्तयामास वानरः ॥ **5.2.22** ॥

कैलासनिलयप्रख्यमालिखन्तमिवाम्बरम्।
ध्रियमाणमिवाकाशमुच्छ्रितैर्भवनोत्तमैः ॥ **5.2.23** ॥

सम्पूर्णां राक्षसैर्घोरैर्नागैर्भोगवतीमिव।
अचिन्त्यां सुकृतां स्पष्टां कुबेराध्युषितां पुरा ॥ **5.2.24** ॥

दंष्ट्राभिर्बहुभिः शूरैः शूलपट्टिशपाणिभिः।
रक्षितां राक्षसैर्घोरैर्गुहामाशीविषैरिव ॥ **5.2.25** ॥

तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः।
रावणं च रिपुं घोरं चिन्तयामास वानरः ॥ **5.2.26** ॥

आगत्यापीह हरयो भविष्यन्ति निरर्थकाः।
नहि युद्धेन वै लङ्का शक्या जेतुं सुरैरपि ॥ **5.2.27** ॥

इमां त्वविषमां लङ्कां दुर्गां रावणपालिताम्।
प्राप्यापि सुमहाबाहुः किं करिष्यति राघवः ॥ **5.2.28** ॥

अवकाशो न साम्नस्तु राक्षसेष्वभिगम्यते।
न दानस्य न भेदस्य नैव युद्धस्य दृश्यते ॥ **5.2.29** ॥

चतुर्णामेव हि गतिर्वानराणां तरस्विनाम्।
वालिपुत्रस्य नीलस्य मम राज्ञश्च धीमतः ॥ **5.2.30** ॥

यावज्जानामि वैदेहीं यदि जीवति वा न वा।
तत्रैव चिन्तयिष्यामि दृष्ट्वा तां जनकात्मजाम् ॥ **5.2.31** ॥

ततः स चिन्तयामास मुहूर्तं कपिकुञ्जरः।
गिरेः शृङ्गे स्थितस्तस्मिन् रामस्याभ्युदयं ततः ॥ **5.2.32** ॥

अनेन रूपेण मया न शक्या रक्षसां पुरी।
प्रवेष्टुं राक्षसैर्गुप्ता क्रूरैर्बलसमन्वितैः ॥ **5.2.33** ॥

महौजसो महावीर्या बलवन्तश्च राक्षसाः।
वञ्चनीया मया सर्वे जानकीं परिमार्गता ॥ **5.2.34** ॥

लक्ष्यालक्ष्येण रूपेण रात्रौ लङ्कापुरी मया।
प्राप्तकालं प्रवेष्टुं मे कृत्यं साधयितुं महत् ॥ **5.2.35** ॥

तां पुरीं तादृशीं दृष्ट्वा दुराधर्षां सुरासुरैः।
हनूमांश्चिन्तयामास विनिःश्वस्य मुहुर्मुहुः ॥ **5.2.36** ॥

केनोपायेन पश्येयं मैथिलीं जनकात्मजाम्।
अदृष्टो राक्षसेन्द्रेण रावणेन दुरात्मना ॥ **5.2.37** ॥

न विनश्येत् कथं कार्यं रामस्य विदितात्मनः।
एकामेकस्तु पश्येयं रहिते जनकात्मजाम् ॥ **5.2.38** ॥

भूताश्चार्था विनश्यन्ति देशकालविरोधिताः।
विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥ **5.2.39** ॥

अर्थानर्थान्तरे बुद्धिर्निश्चितापि न शोभते।

घातयन्तीह कार्याणि दूताः पण्डितमानिनः ॥ **5.2.40** ॥

न विनश्येत् कथं कार्यं वैक्लव्यं न कथं भवेत्।
लङ्घनं च समुद्रस्य कथं नु न भवेद् वृथा ॥ **5.2.41** ॥

मयि दृष्टे तु रक्षोभी रामस्य विदितात्मनः।
भवेद् व्यर्थमिदं कार्यं रावणानर्थमिच्छतः ॥ **5.2.42** ॥

नहि शक्यं क्वचित् स्थातुमविज्ञातेन राक्षसैः।
अपि राक्षसरूपेण किमुतान्येन केनचित् ॥ **5.2.43** ॥

वायुरप्यत्र नाज्ञातश्चरेदिति मतिर्मम।
नह्यत्राविदितं किञ्चिद् रक्षसां भीमकर्मणाम् ॥ **5.2.44** ॥

इहाहं यदि तिष्ठामि स्वेन रूपेण संवृतः।
विनाशमुपयास्यामि भर्तुरर्थश्च हास्यति ॥ **5.2.45** ॥

तदहं स्वेन रूपेण रजन्यां ह्रस्वतां गतः।
लङ्कामभिपतिष्यामि राघवस्यार्थसिद्धये ॥ **5.2.46** ॥

रावणस्य पुरीं रात्रौ प्रविश्य सुदुरासदाम्।
प्रविश्य भवनं सर्वं द्रक्ष्यामि जनकात्मजाम् ॥ **5.2.47** ॥

इति निश्चित्य हनुमान् सूर्यस्यास्तमयं कपिः।
आचकाङ्क्षे तदा वीरो वैदेह्या दर्शनोत्सुकः ॥ **5.2.48** ॥

सूर्ये चास्तं गते रात्रौ देहं सङ्क्षिप्य मारुतिः।
वृषदंशकमात्रोऽथ बभूवाद्भुतदर्शनः ॥ **5.2.49** ॥

प्रदोषकाले हनुमांस्तूर्णमुत्पत्य वीर्यवान्।

www.prapatti.com

प्रविवेश पुरीं रम्यां प्रविभक्तमहापथाम्॥ **5.2.50** ॥

प्रासादमालाविततां स्तम्भैः काञ्चनसन्निभैः।
शातकुम्भनिभैर्जालैर्गन्धर्वनगरोपमाम्॥ **5.2.51** ॥

सप्तभौमाष्टभौमैश्च स ददर्श महापुरीम्।
तलैः स्फटिकसङ्कीर्णैः कार्तस्वरविभूषितैः॥ **5.2.52** ॥

वैदूर्यमणिचित्रैश्च मुक्ताजालविभूषितैः।
तैस्तैः शुशुभिरे तानि भवनान्यत्र रक्षसाम्॥ **5.2.53** ॥

काञ्चनानि विचित्राणि तोरणानि च रक्षसाम्।
लङ्कामुद्योतयामासुः सर्वतः समलङ्कृताम्॥ **5.2.54** ॥

अचिन्त्यामद्भुताकारां दृष्ट्वा लङ्कां महाकपिः।
आसीद् विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः॥ **5.2.55** ॥

स पाण्डुराविद्धविमानमालिनीं
    महार्हजाम्बूनदजालतोरणाम्।
यशस्विनीं रावणबाहुपालितां
    क्षपाचरैर्भीमबलैः सुपालिताम्॥ **5.2.56** ॥

चन्द्रोऽपि साचिव्यमिवास्य कुर्वं-
    स्तारागणैर्मध्यगतो विराजन्।
ज्योत्स्नावितानेन वितत्य लोका-
    नुत्तिष्ठतेऽनेकसहस्ररश्मिः॥ **5.2.57** ॥

शङ्खप्रभं क्षीरमृणालवर्ण-
    मुद्गच्छमानं व्यवभासमानम्।

ददर्श चन्द्रं स कपिप्रवीरः
पोप्लूयमानं सरसीव हंसम् ॥ **5.2.58** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वितीयः सर्गः ॥

www.prapatti.com